# हस्तविद्यायाः प्रमुखता

डॉ. सीमा शर्मा

**''अङ्गे हस्तः प्रशस्तोऽयं शीर्षादपि विशिष्यते।**
**साध्यन्ते पादशौचाद्या धार्मिक्यो येन सत्क्रियाः।।''**

अङ्गविद्यायां यद्यपि सर्वशरीरलक्षणानामध्ययनं क्रियते। तथापि सर्वेषु शरीराङ्गेषु हस्तोऽयं प्रशस्तोऽस्ति यतोहि मनुष्यः हस्ताभ्यामेव पादशौचादिसर्वधर्माधर्मकर्माणि प्रतिपादयति। कथितम् -

**''हस्तेन पाणिग्रहणं पूजाभोजनशान्तयः।**
**साध्या विपक्षविध्वंसप्रमुखाः सकलाः क्रियाः।।**
**मन्त्राक्षराणामोङ्कारे यथा तत्त्वं प्रतिष्ठितम्।**
**तथा सामुद्रिकस्यापि तत्त्वं हस्ते निवेशितम्।।**
**नास्ति हस्तात्परं ज्ञानं त्रैलोक्ये सचराचरे।**
**यद्ब्राह्म्यं पुस्तकं हस्ते धृतबोधाय जन्मिनाम्।।**

प्राचीनमतानुसारं हस्तेनैव विवाहपूजाभोजनशान्तिशत्रुविनाशादिकार्याणि भवन्ति। यथा मन्त्रेषु ओङ्कारस्य 'ॐ'-तत्त्वस्य प्रतिष्ठा तथैव सामुद्रिकशास्त्रेषु हस्तस्य प्रधानता भवति। तस्मिन् सर्वाणि तत्त्वानि निहितानि सन्ति। हस्तरेखाशास्त्रज्ञानात्परं किमपि ज्ञानं नास्ति।

**''सर्वाङ्गलक्षणप्रेक्षाव्याकुलानां नृणां मुदे।**
**श्रीसामुद्रेण मुनिना तेन हस्तः प्रकाशितः।।''**

समुद्रऋषिणापि कथितं यत् हस्तं तु ब्रह्मणा निर्मिता ईदृशी अक्षया जन्मपत्री अस्ति येन जीवनपर्यन्तं व्यवस्थितेन हस्तरेखाः ग्रहवत् फलानि ददति।.

**''अक्षया जन्मपत्रीयं ब्रह्मणा निर्मिता स्वयम्।**
**ग्रहा रेखाप्रदा यस्यां यावज्जीवं व्यवस्थिता।।''**

(क) हस्तपरीक्षायाः प्रकारत्रयम्

**''दर्शनात्स्पर्शनाद्वापि तथा रेखाविमर्शनात्।**
**हस्तज्ञानं त्रिधा प्रोक्तं पुरातनमहर्षिभिः।।''**

प्राचीनमतानुसारं हस्तद्वारा फलादेशात् पूर्वं हस्तपरीक्षणमावश्यकं वर्तते। अस्य त्रीणि चरणानि हस्तदर्शनं हस्तस्पर्शनं हस्तविमर्शन वर्तन्ते।

आधुनिकविचारधारायामपि विचारकैः कथितं यत् हस्तं दर्शयित्वा स्पृष्ट्वा रेखानां विश्लेषणं कृत्वा मनुष्यस्य भविष्यफलं सरलतया ज्ञातुं शक्यते।

**(ख) हस्तस्य व्यवहारिकं महत्त्वम्**

सामान्यतया हस्तेनेव सर्वाणि कार्याणि क्रियन्ते। हस्तं तु ब्रह्मणा निर्मिता अक्षया जन्मपत्री अस्ति।

विषयेऽस्मिन् डब्ल्यु-जी.-बेन्हम-महोदयेन लिखितम् - ''गर्भे जीवः क्रियाशीलः न भवति। यदा गर्भात् बहिः आगच्छति, तत्क्षणेनैव रक्तसंचालनेन शरीरे प्रभावः भवति। सर्वप्रथमं हस्तयोः, येन शिशोः मुष्टयः अनन्तरं मस्तिष्केन जीवनशक्तेः प्रभावे करतले गते हस्तरेखाः निर्मीयन्ते, यासां कालान्तरे विकासः भवति।''

अर्थात् हस्तं तु शरीरस्य प्रथमः क्रियाशीलमङ्गः वर्तते। अस्याध्ययनमावश्यकं वर्तते यतोहि प्राचीनमते अस्य व्यवहारिकं महत्त्वमस्ति।

**(ग) हस्ते सर्वेषां देवानां निवासः**

मेघविजयगणि विदुषा पाङ्गुलीदेवीं हस्ते विराजितां मत्वा तस्याः साधनाविधिमन्त्र स्वग्रन्थे 'हस्तसञ्जीवने' उक्तम् -

**''पाङ्गुलीर्महादेवी श्रीसीमाधरशासने।**
**अधिष्ठात्री करस्यासौ शक्तिः श्रीत्रिदशेशितुः।।''**

मन्त्रः - ऊँ नमो पाङ्गुली पाङ्गुली ........... ऊँ हः हः हः हः स्वाहा।''

**(घ) पाङ्गुल्याः देव्याः साधनाः**

**साधनाविधिः -**

कार्तिकमासे हस्तनक्षत्रे दिवसे शुभमुहूर्त्ते देवीं षोडशोपचारेण पूजयित्वा 108 वारं मन्त्रस्य आवृत्तिं कुर्यात्। पमेवाभिः आहुतिं दद्यात्। ईदृशं प्रतिदिनं कृत्वा यदा मार्गशीर्षे हस्तनक्षत्रं स्यात् तदा विधानने शान्तिं कुर्यात्। पूर्णब्रह्मचर्यं व्रतं पालयित्वा मन्त्रमिदं सिद्ध्यति।

अस्मात्परं प्रायः धर्मशास्त्रीयकर्मकाण्डीयप्राचीनग्रन्थेषु वापि यथा 'आचार-प्रदीप'- 'आह्निकसूत्रावली' इत्यादिषु कथितम्। ब्राह्येर्मुहूर्त्ते उत्थाय सर्वप्रथमं हस्तदर्शनं कर्तव्यम्। यतो हि हस्तस्य अग्रभागे लक्ष्म्याः, करमध्ये सरस्वत्याः हस्तस्य मूले च ब्रह्मदेवस्य निवासः अस्ति।

**''कराग्रे वसते लक्ष्मी करमध्ये सरस्वती।**
**करमूले स्थितो ब्रह्मा प्रभाते करदर्शनम्।।''**

केचन अन्ये विद्वांसः इदं मतं स्वीकृत्य कथयन्ति यत् धर्मार्थकाममोक्षस्वरूपस्य ब्रह्मणः स्थानं करमूलेऽस्ति तथा च हस्ते आधिभौतिकाधिदैविकाध्यात्मिकरूपेषु लक्ष्मीसरस्वतीविष्णुदेवानां स्थितिः भवति।

आधुनिकविचारका: हस्तस्याग्रभागं पदार्थवाचकं तथा च अन्यभागं यथार्थवाचकं (भौतिकतत्त्वज्ञानबोधकं) स्त:। कथनस्य तात्पर्यमस्ति विद्वांस: स्वस्वग्रन्थेषु स्वधर्मानुसारं देवान् जयन्ति। प्रभाते हस्तदर्शनेन देवदर्शनेन वा पुण्यसिद्धि: भवति।

**2. प्रकरणम् (पुण्यसाधनं न्यासविधि: हस्तदर्शनरीतिश्च)**

**(क) हस्ते सर्वेषां तीर्थानां निवास:**

**"मूलेऽङ्गुष्ठस्य स्याद् ब्राहम्यं तीर्थं कायं कनिष्ठयो:।**
**पित्र्यं तर्जन्यङ्गुष्ठान्तर्दैवतं त्वङ्गुलीमुखे।।"**

सम्बन्धेऽस्मिन् स्मृतिकार: मनुरपि लिखति

**"अङ्गुष्ठस्य तले ब्राह्मतीर्थं प्रचक्षते।**
**कायमङ्गुलिमूलेऽग्रे दैवं पैत्र्यं ज्ञयो: अध:।।"**

अर्थात् अङ्गुष्ठस्य मूले ब्राह्मतीर्थं, कनिष्ठाया: मूले कायतीर्थं अङ्गुलीनामग्रभागेषु दैवतीर्थं तर्जन्यङ्गुष्ठयोश्च मध्ये पितृतीर्थ भवति। अत एव प्रत्येकं मन्त्रस्य जपात् पूर्वे करन्यासमनिवार्यमस्ति।

**"शत्रुभ्यस्तु तर्जन्यां मध्यमायां जयन्तक:।**
**अर्बुद: खलु सावित्र्यां कनिष्ठायां स्यमन्तक:।।**
**अङ्गुष्ठेऽष्टापदगिरि: पतीर्थान्यनुक्रमात्।**
**स्वहस्तदर्शनेनैव वन्द्यन्ते प्रातरुत्तमै:।।"**

अनेन प्रकारेण मनुष्य: हस्तदर्शनेन अनायासेन सर्वदेवतीर्थानां दर्शनं करोति। श्लोकेऽस्मिन् पतीर्थानि वर्णयन्ते।

*संस्कृत शिक्षिका, दिल्ली सरकार*